Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 2 | ISSN : 2581- 6306

# नादबिन्दूपनिषदनुसारेण नादानुसन्धानम्

Prabir Dhall
Research Scholar, National Sanskrit University, Tirupati, India

**Article Info**

**Publication Issue :**
March-April-2023
Volume 6, Issue 2
**Page Number :** 99-103
**Article History**
Received : 07 March 2023
Published : 15 April 2023

**शोधसारांशः-** योगसिद्धान्तमाधारीकृत्यैव विंशतिसंख्यात्मकाः उपनिषदः सन्तीति पूर्वोक्तम्। तत्र नादबिन्दूपनिषद् परिगणितास्ति। नादबिन्दुपनिषद् एका क्षुद्रकाया उपनिषद्। इयमुपनिषद् ऋग्वेदेन सह सम्बद्धा अस्ति। अत्र आहत्य 56 श्लोकाः सन्ति। नादबिन्दूपनिषद् अध्यायत्रयेषु पुस्तकाकारेण उपस्थापिता अस्ति। प्रत्येकस्मिन् अध्याये त्रयः विभागाः वर्तन्ते। तत्र कथानुसारिण्यः श्लोकसंख्याःउद्धृताः सन्तीति शम्।

**मुख्यशब्दाः-** शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, उपनिषद्, नादः, अनुसन्धानम्, योगसिद्धान्तः।

**नादशब्दस्यार्थः-** नादशब्दस्य साधारणार्थः ध्वनिः। अमरकोषे नादशब्दस्य केचन समानर्थकाः शब्दाः उल्लिखिताः सन्त। यथा – शब्दः, निनादः, निनदः, ध्वनिः, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्ह्रादः, निस्वानः, निस्वनः, आरवः, आरावः, संरावः, विरावः, रणः, प्रत्ययः, तुमुलः, घोषश्चेति। यथा उच्यते –

**"शब्दे निनादनिनदध्वनिध्वानरवस्वनाः।**
**स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः॥ "[1]**

नादः नाम सर्वजीननं स्पन्दनम्, प्रविहितचेतनस्य प्रवाहो वेति। योगव्यायामे नादस्तु एकः रहस्यमयशब्दः, अनित्यः अतिसूक्ष्मध्वनिः।

शब्दसृष्टेः प्रथमाभिव्यक्तिरेव नादः। शब्दार्थयोः सूक्ष्माशोधितवस्तुनोः उद्भवविभेदसृष्टिहेतुरेव शब्दब्रह्म। परमशिवेन सह एकत्वार्जनार्थं नादबिन्दुयोगः निर्दिष्टः तन्त्रसाधनायामिति। महाविश्वरूपेण उद्भासितचेतनमेव नादः इति शाक्ताः। अस्यार्थः सूक्ष्मध्वनिः। अनुनासिकशब्दस्तु ऊर्मिकावत्। संवृतौष्ठद्वयोः यः शब्दः नादः इत्युच्यते। नास्ति अस्य व्याख्यान्तरोपायः। नादं विहाय बिन्दुः पृथग्रूपेण कार्यकरो न भवेत्। नादबिदुः नाम शिव-शक्त्योः मिलनमेव अवगम्यते। नादः नाम शक्तिः बिन्दुस्तु शिवः। "वृहद्देशी"[2] इत्यनुसारेण नादः नाम पञ्चविधाः ध्वनियः। यथा – 1)सूक्ष्मः, 2)अत्यन्तसूक्ष्मः सुसूक्ष्मः वेति, 3)प्रकाशः व्यक्तः वेति, 4) अव्यक्तः, 5) कृत्रिमः चेति। अयं नादः विविधप्रकारेण अभिव्यज्यते। मन्थनभैरवतन्त्रानुसारेण नादस्तु एकं

1.अमरकोषः -1/6/22/2/3

2. नादोऽयं नदतेर्धातोः स च पञ्चविधो भवेत्।
सुक्ष्मश्चैवातिसुक्ष्मश्च व्यक्तोऽव्यक्तश्च कृत्रिमः।। – वृहद्देशी – 23

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

पवित्रस्थानम्। पीठरूपेण वर्गीकृतोऽस्ति। अव्यक्तपीठेन सह संयुक्ता: अष्टसु भैरवेषु अयं तु एक:। अष्टौ भैरवा: यथा – नित्य:, नाद:, अज:, करणम्, अव्यय:, सवर्गा, शाश्वत:, स्थानु: इति।

चक्रसम्भारसमाध्यनुसारेण नादस्तु गर्जनस्वरूप:। नेपालस्थानां महायानवज्रयानबौद्धानां साधनानुशीलनवेलायां तु चक्रसम्भारध्यान: प्राय: चक्रसम्भारसमाधिना सह सम्मिलितरूपेण अनुष्ठीयते। अयं तु नादसाधनाया: उपायविशेष:।

प्राणवाय्वग्नयो: संयोगे य: ध्वनिरुत्पद्यते स: नाद: इति सङ्गीतरत्नाकरे उक्तमस्ति। अत्र 'ना' इति प्राणवायु:, 'द' इति अग्नि:।

**"नकारं प्राणनामानं दकारमनलं विदु:।**

**ज्ञात: प्राणाभिसंयोगातेन नादोऽभिधीयते॥"**[3]

श्रीमतङ्गमुनिकृते 'बृहद्देशी' इति ग्रन्थे नादस्वरूपमस्ति –

**"नकार: प्राण इत्याहुर्दकारश्चानलो मत:।**

**नादस्य द्विपदार्थोऽयं समीचीनो मोयदित:॥"**[4]

वायुगुणत्वेन नाद: मीमांसकै: अङ्गीकृत:। यद्यपि वायु: न श्रवणेन्द्रियग्राह्य:। तथापि वायो: वैविध्यकारणत्वात् कस्यचित् वायो: श्रवणत्वमङ्गीकृत्य तद्गतधर्मस्य नादस्यापि श्रवणत्वमुपपाद्यते। पूर्वमीमांसाया: शाबरभाष्ये उच्य –

**"वायवीया: संयोगविभागा: शब्दमभिव्यञ्जयन्तो नादशब्दवाच्या:"**

श्लोकवार्त्तिके अस्ति –

**"नादो वायुगुणस्तद्वान् वायुर्वा यदि कल्प्यते।"**

पार्थसारथिमिश्रकृत 'न्यायरत्नाकर:' इत्याख्यायां टीकायां 'नाद' इति विषये प्रतिपादितमस्ति –

**"वायवीय: संयोगविभागा: संयोगविभागविशिष्टो वायुर्वा नादो न तु शब्दविशेष:।"**

नादस्तु वायुगुण: शब्दश्चेति इति वैयाकरणैरपि स्वीकृत:। किन्तु तेषां मते नाद–ध्वनी उभौ शब्दौ अव्यक्तविशेषौ, यथा – मृदङ्गशब्द:, मेघगर्जनम्, अकारादय: व्यक्तवर्णा: इति। उद्योतकार: उवाच – **"नादो वर्ण:"**। वाक्यपदीयस्य बहुस्थाने भर्तृहरिणा 'नाद:' इति शब्द: व्यवहृत:। प्राय: ध्वनिशब्दस्य पर्यायशब्दरूपेण शब्दोऽयं प्रयुक्त:।

❖ **नादानुसन्धानस्य अधिकारी -** नादानुसन्धानाद् प्रागेव अस्माभि: ज्ञातव्यं यत् अस्मिन् अनुसन्धाने क: समर्थोऽधिकारी अस्ति अर्थात् कस्यास्मिन् कार्ये अर्हता वर्तते। नादबिन्दूपनिषदि उक्तमस्ति यत् सिद्धासने स्थित: सन् योगी वैष्णवीमुद्रामवलम्ब्य स्वान्त:स्थितस्य नादस्यानुसन्धानं करिष्यति। अर्थात् अनुसन्धाता सिद्धासने अर्हो भवेत्। 'स्थिरसुखमासनम्' इति आसनसंज्ञाया: अयमर्थ: यत् आसनाभ्यासेन चित्तं स्थिरं सुखकरं च स्यात्। किन्तु आसनाभ्यासात्प्रागेव योगिना किचेन नियमा: अवश्यमेव अनुसर्तव्या:। योगी स्वल्पाहारी भवेत् अर्थात् तस्य कृते अधिकभोजनं निषिद्धमस्ति। प्रमाद:, आलस्यं, भ्रान्तिदर्शनमित्येते गुणा: योगिभि: त्यक्तव्या:। अर्थात् योगी नादब्रह्मण: अस्पष्टं भ्रान्तं च चिन्तनं स्वचित्तात् अपसारयेत्। आलस्यं तु साधनामार्गे विपत्तिं जनयति। अत: निरन्तरमभ्यासपुरस्सरं तां विपत्तिं दूरीकृत्य य: योगी मनस: संयमनं सम्पादयति स: एव नादानुसन्धानस्य सदधिकारी। तदर्थं पञ्चकेश्लेभ्य: स्वचित्तमपसारयेत्। यथा –

---

3. सङ्गीतरत्नाकर – 6

4. **बृहद्देशी - 22**

**"अविद्याऽस्मितारागन्वेषाभिनिवेशा: पञ्चक्लेशा:।"**[5]

अर्थात् अविदाऽस्मितारागद्वेषाभिनिवेशा: पञ्च क्लेशा:। एतेषु अविद्यैव प्रधानभूता। इतराणि तु तत्फलानीति उच्यन्ते। अविद्यैव सकलदु:खानां मुख्या कारणभूता। अत: आदौ चित्तात् अविद्या दूरीकर्तव्या।

**अधिकारिण: वैशिष्ट्यम् –**

i. मिताहारी,
ii. अनासक्त:।
iii. निरलस:।
iv. वीतरागी अर्थात् विषयं न चिन्तयति।
v. शौचव्रताचारी।
vi. सत्त्वगुणवृद्धौ यत्नशील: इति।

गोरक्षनाथस्य मते येषां तत्त्वज्ञानं नास्ति नैव भविष्यति तादृशानां मूर्खाणां कृते अनाहतनादरेव उपयोगिनी साधना।

**अशक्यतत्त्वबोधानां मूढानामपि सम्मतम्।**
**प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते।।**[6]

❖ **नादानुसन्धानम् -** अनुपलब्धविषयस्य उललब्धिकरणमेव अर्थात् नूतनतथ्याविषकरणमेव अनुसन्धानम्। अनु–उपसर्गात् तथा सम्–उपसर्गात् धा–धातो: ल्युट्–प्रत्ययेन अनुसन्धानम् इति पदमपि निष्पद्यते।

नादानुसन्धानं नाम जीवस्यात्मोपलब्धि: ब्रह्मोपलब्धि: वेति। जगत: अन्त:स्थले य: अखण्डनाद: विराज्यते तथा आकाशमण्डले निरन्तरं ध्वन्यते सोऽयं नाद: उपलभ्यते। इदमेव नादानुसन्धानम्। बद्धजीवा: तु श्वासप्रश्वासाधीना: सन्ति। शास्त्रमते जीवानां नाडीत्रयमस्ति। यता – इडा, पिङ्गला, सुषुम्ना चेति। प्राणिनां सुषुम्नमार्ग: प्राय: अवरुद्ध: तिष्ठति। यतो हि तेषां इन्द्रियं चित्तं च सर्वदैव बहिर्मुखमयं भवति। एनं तु अन्तर्मुखीकरणाया साधनया सह गुरुकृपा अपि आवश्यिकी अस्ति। गुरुकृपया चित्तैकाग्रे सति प्राणवायु: सुषुम्नानाड्यां प्रविशति। रिक्तस्थले वायुप्रवेशेन अनाहतनादध्वनि: श्रूयते। सुदीर्घकालव्यापिन्या साधनया यो योगी चित्तं स्वायत्तीञ्चकार,स: एव एनं नादं श्रोतुमर्हति।

नादानुसन्धानं नाम हृदि ब्रह्मान्वेषणमिति। अत: साधक: धैर्येण नादे स्वात्मानं संनिवेशयति। सर्वादौ नादधारणा सुस्पष्टा न भवति। शुद्धे शान्तेवातावरणे परिवेशे च ध्यानकरणेन क्रमेण नाद: योगिनां कृते स्पष्टो भवति।

❖ **नादसाधनाया: फलम् -** गीतेन ध्वनिना वा यो योग: क्रियते स: नादयोग:। इतरयोगसाधनासमा नादयोगसाधनेयं शारीरिक–मानसिक–बौद्धिक–आध्यात्मिकक्षेत्रेषु लाभादायिनी वर्तते।

**(क) रोगप्रतिरोधक्षमतावृद्धि: -** रोगप्रतिरोधक्षमतावर्धनाय बहव: उपाया: योगसाधनाश्च वर्तन्ते। अनेन नादयोगेन देहे रोगप्रतिरोधशक्ति: निर्मीयते। योगेऽस्मिन् य: ध्वनि: कम्पमान: अनुभूयते स: शरीरस्य अङ्गानानां सक्रियतां सम्पाद्य रोगप्रतिरोधक्षमतां वर्धयति।

---

[5]. **पतञ्जली योगसूत्र – 2/3**

[6]. हठयोगत्रयी – **65**

**(ख) अवसाददूरीकरणम् -** वर्तमानसमये 'डिप्रेसन्' अर्थात् विषादग्रस्थानां मानवानां संख्या बह्वी अस्ति। अत: आत्महननं, सम्परविच्छेद:, एकाकीत्वमित्यादयोऽपि वर्धिता: सन्ति। नादयोगेन सप्तचक्रस्य सक्रियता परिलक्ष्यते। मानसिकावसादं दूरीकृत्य मनस: स्थितिशीलतां सम्पादयितुं योगसाधनायारस्या: उपयोगिता वर्तते।

**(ग) स्मृतिशक्तिवृद्धि: -** ध्वनिस्तु नादयोगस्य केन्द्र:। प्रात्यहिकयोगाभ्यासेनैव चित्तैकाग्रता वर्धते। चित्तैकाग्र्येण ज्ञानं लभते। एवञ्च ज्ञानधारणक्षमता अर्थात् स्मृतिशक्तिरपि वृध्यते।

**(घ) श्वाससम्बन्धिन्या: समस्याया: दूरीकरणम् -** नादयोगाभ्यासाय शान्तपरिवेशे उपवेशनीयम्। अत्र प्राणायामाभ्यास: करणीय:। येन तु श्वाससम्बन्धिनी समस्या दूरीभूता भवति।

**(ङ) आनन्दलाभ: -** अस्माकं शरीरे न्यूरोट्रान्स्मीटर् नामके स्थाने डोपामाइन-सेरोटोनिन् इति हरमोन् द्वयम् स्त:। एताभ्यां कारणादेव सर्वे आनन्दिता: भवन्ति इति वैद्यमतम्। नादयोगसाधनाहेतो: एतयो: हरमोन् द्वयो: यथार्थ्यं नि:सरणं भवति। अत: योगी सदा आनन्दित: तिष्ठति। शिवसंहितायामस्ति नादलेय सति योगी उन्मत्तत: सन् बाह्यज्ञानशून्य: सन् दिव्यानन्दमनुभवति।

**लये नादे यदा चित्तं रमते योगिनो भृशम्।**

**विस्मृत्य सकलं बाह्यं नादेन सह शाम्यति॥**

**(च) आनन्दप्राप्ति:** -नादानुसन्धानेनैव योगिभि: अखण्डं सुखं प्राप्यते। तच्च अस्मिन् जन्मनि एव भवति। राजयोगेन अर्थात् चित्तैकाग्र्यतयैव नादानुसन्धाने इयमानन्दप्राप्तिर्भवति।

**अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम्।**

**लयोद् भवमिदं सौख्यं राजयोगादवाप्यते॥**

**राजयोजमजानन्त: केवलं हठकर्मिण:।**

**एतानभ्यासिनो मन्ये प्रयासफलवर्जितान्॥**[7]

**(छ) पापक्षय:-** नित्यनादानुसन्धानेन योगिनां कर्मकृतं पापं क्षीयते। निर्गुणं चित्तस्वरूपं परब्रह्मणि लीयते। यथा –

**सदा नादानुसन्धानात् क्षीयन्ते पापसंयचा:।**

**निरञ्जने विलीयते निश्चितं चित्तमारुतौ॥**[8]

**(ज) आत्मज्ञानप्राप्ति: ब्रह्मज्ञानप्राप्तिर्वा-** हठयोग-मन्त्रयोग-भक्तियोग-कर्मयोगवत् नादयोगस्यापि मुख्यप्राप्तिस्तु अशेषसुखम् अर्थात् ब्रह्मोपलब्धि: आत्मोपलब्धिश्चेति। अनया साधनया यदा कुण्डलिनी प्रबुध्यते तदा योगसाधकेन ब्रह्मज्ञानमाप्य दु:खेभ्य: निवृत्तो भवति। नादसाधकस्य विषयवासना दूरीभूता भवति तथा मन: लीयते।

**मकरन्दं पिबन्भृङ्गो गन्धान्नापेक्षते यथा।**

**नादासक्तं सदा चित्तं विषयं न हि काङ्क्षति॥**[9]

हठप्रदीपिकायामुक्तं यत् सदा नादानुसन्धानेन पापक्षय: भवति। तथा निर्गुणे चैतन्ये ब्रह्मणि मन: प्राणश्च लीयेते। यथा –

7. **हठयोगत्रयी – 78,79**

8. **हठयोगप्रदीपिका - 105**

9 नादबिन्दूपनिषद् – 42

**सदा नादानुसन्धानात् क्षीयन्ते पापसंचयाः।**
**निरञ्जने विलीयते निश्चितं चित्तमारुतौ॥**

**सन्दर्भग्रन्थसूची**


1. नादबिन्दूपनिषद् – पङ्कज वाला शर्मा – संजयप्रकाशन 2021
2. योगसूत्रम् – राधाच, चौखम्वासंस्कृतभवनम्,वाराणसी, 1999
3. अमरकोषः – अमरसिंहः, चौखम्वासंस्कृतसंस्थानम्, वाराणसी, 1992
4. हठयोगप्रदीपिका – दूलिपाल राममूर्ति, चौखम्वासंस्कृतप्रतिष्ठानम्, वाराणसी, 1974
5. वृहद्देशी – संस्कृतग्रन्थप्रकाशन, कोकम्यान्दाः 1903